# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ७ | गुणाः – ५० |
| विषयः – नव्यव्याकरणम् | सत्रम् – ६ (OLD) | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – २०/०७/२०२१ | सन्दर्भग्रन्थः – परिभाषेन्दुशेखरः, वाक्यपदीयञ्च | |

सूचना - निम्नलिखितेषु दशसु प्रश्नेषु केचित् पञ्च प्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

**प्रश्नः १ अधोलिखितासु द्वयोः परिभाषयोर्विवेचनं ग्रन्थानुसारं करोतु।** **१०**

१ पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्।

२ अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति।

३ अभ्यासविकारेषु बाध्यबाधकभावो नास्ति।

**प्रश्नः २ 'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत' इति परिभाषां विवेचयत।** **१०**

**प्रश्नः ३ 'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुपसर्गाः' इति परिभाषां विवेचयत।** **१०**

**प्रश्नः ४ अधोलिखितासु द्वयोः परिभाषयोर्विवेचनं ग्रन्थानुसारं करोतु।** **१०**

१ अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते।

२ ताच्छीलिकेषु वाऽसरूपविधिर्नास्ति।

३ क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति।

**प्रश्नः ५ 'लादेशेषु वाऽसरूपविधिर्नास्ति' इति परिभाषां ग्रन्थानुसारं विवेचयत।** **१०**

**प्रश्नः ६ 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति परिभाषां ग्रन्थानुसारं विवेचयत।** **१०**

**प्रश्नः ७ अधोलिखितासु द्वयोः कारिकयोः ग्रन्थानुसारं व्याख्यानं विधेयम्।** १०

१ शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम्।
अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः।।

२ धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः।
न ताँल्लोकप्रसिद्धत्वात् कश्चित्तर्केण बाधते।।

३ निर्ज्ञातशक्तेर्द्रव्यस्य तान्तामर्थक्रियां प्रति।
विशिष्टद्रव्यसम्बन्धे सा शक्तिः प्रतिबध्यते।।

**प्रश्नः ८ 'इदं पुण्यमिदं पापमित्येतस्मिन्पदद्वये।** १०
**आचाण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम्।।'** इति कारिका यथाग्रन्थं व्याख्यायत।

**प्रश्नः ९ 'अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम्।** १०
**तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक्।।'** इति कारिका यथाग्रन्थं व्याख्यायत।

**प्रश्नः १० निम्नलिखितेषु प्रश्नेषु दशनां प्रश्नानां लघूत्तरं देयम्।** १०

१ परिभाषेन्दुशेखरस्य कर्ता कः?
२ परिभाषेन्दुशेखरस्य कति प्रकरणानि सन्ति ?
३ परिभाषेन्दुशेखरस्य द्वितीयप्रकणरणस्य नाम किम् ?
४ अन्तरङ्गान् विधीन् को बाधते ?
५ के अकृतव्यूहाः ?
६ अन्तरङ्गानपि बलवान् के भवति ?
७ कुत्रापवाद अन्तरङ्गेण बाध्यते ?
८ अभ्यासविकारेषु बाध्यबाधकभावो न भवतीति कया परिभाषया ज्ञायते ?
९ क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्भवति न वा ?
१० वाक्यपदीयस्य रचयिता कः ?
११ शब्दार्थयोः परस्परं कः सम्बन्धः ?
१२ कार्यकारणयोः अभेदाध्यवसायात् शब्दार्थयोः कः सम्बन्धः अस्ति।
१३ 'ये सिद्धाः ते साधवः' तस्मात् ते कस्य साधनम् ?
१४ शब्दे द्रव्यत्वाभावः केन प्रमाणेन साध्यते ?
१५ आगमलोचनविहीनः कीदृशः ?

****